दिनाङ्क :- 27.11.2026

प्रातः - 06:55

अथवार्ताः

लोकसभायाः राज्यसभायाश्च अधिवेशनानि

प्रशासनिक-आवश्यक-कार्याणां निष्पादनार्थं लोकसभायाः अधिवेशनं नवम्बरमासस्य त्रिंशत्-दिनाङ्कात् पुनः समारप्स्यते, राज्यसभायाः च अधिवेशनं दिसम्बरमासस्य द्वितीयदिनाङ्कात् पुनः प्रारप्स्यते। उभयोः सदनयोः अधिवेशनानि कार्यावश्यकतानुसारं दिसम्बरमासस्य तृतीयदिनाङ्के समाप्तानि भवितुम् अर्हन्ति। उभयोः सदनयोः अधिवेशनकाले प्रश्नकालः, शून्यकालः तथा अशासकीयसदस्यानां कार्याणि न भविष्यन्ति। लोकसभायाः विज्ञप्त्यनुसारं, अध्यक्षः ओमबिरला निर्देशं दत्तवान् यत् अस्य वर्षस्य अगस्तमासस्य त्रयोदशदिनाङ्के अनिश्चितकालाय स्थगितं लोकसभायाः अधिवेशनं सोमवासरे प्रातः एकादशवादने पुनः समवेष्यते। राज्यसभायाः विज्ञप्तौ अपि उक्तं यत् अगस्तमासस्य त्रयोदशदिनाङ्के अनिश्चितकालाय स्थगिता राज्यसभा, सभापतेः सी. पी. राधाकृष्णन्-वर्यस्य निर्देशानुसारं आवश्यकशासकीयकार्याणां सम्पादनार्थं बुधवासरे प्रातः एकादशवादने पुनः समवेष्यते। अगस्तमासस्य त्रयोदशदिनाङ्के उभयोः सदनयोः अधिवेशनानाम् अनिश्चितकालाय स्थगनानन्तरम् अद्यावधि प्रावृट्-सत्रस्य सत्रावसानं न जातम्।

राष्ट्रपतिः - संविधानदिवसः

राष्ट्रपतिः द्रौपदी मुर्मुः उक्तवती यत् भारतीयन्यायपालिका परिवर्तमानपरिस्थितीनाम् अपेक्षाणां च अनुरूपं न्यायस्य मूलभूतादर्शान् निरन्तरं संरक्षति तथा तान् सुदृढान् करोति। राष्ट्रपतिः ह्यः नवदिल्ल्यां सर्वोच्चन्यायालयेन आयोजितं संविधानदिवससमारोहं सम्बोधयन्ती उक्तवती यत् न्यायस्य अवधारणायां समयानुसारं न्यायप्रदानम् अत्यन्तम् आवश्यकम् अस्ति। सा अवदत् यत् न्यायः समये एव सर्वेभ्यः सुलभः भवेत् इति सुनिश्चेतुं न्यायपालिका न्यायप्रक्रियाणां सरलीकरणं, प्रौद्योगिक्याः उपयोगः, विशेषन्यायालयानां स्थापना इत्यादीनि विविधानि उपायानि करोति। न्यायपालिकायाः सर्वेषु स्तरेषु क्रियमाणैः सामूहिकप्रयत्नैः एतस्याः समस्यायाः समाधानं भविष्यतीति सा विश्वासं प्रकटितवती।

[S/B - PRESIDENT - VALUES - 35 SECS]

आई.ओ.आर्.ए.

भारतम् अद्य नवदिल्ल्याम् आई.ओ.आर्.ए इति हिन्दमहासागरपरिमण्डलसङ्घटनस्य मन्त्रिपरिषदः पञ्चविंशतितमस्य उपवेशनस्य आतिथ्यं करिष्यति। विदेशमन्त्री डॉ. एस. जयशङ्करः, सेशेल्सदेशस्य विदेशमन्त्री बैरी फॉरे, मॉरीशसदेशस्य विदेशमन्त्री धनञ्जय रामफुल् श्रीलङ्कादेशस्य विदेशमन्त्री

विजिथा हेराथ् अथ अन्ये प्रतिनिधयः च अस्मिन् उपवेशने भागं ग्रहीष्यन्ति। आई.ओ.आर्.ए इत्येतस्य विषयः अस्ति - “हिन्दमहासागरक्षेत्रे नवाचारः, उदारता, सुदृढता तथा अनुकूलनक्षमता”।

॥ विरामः ॥

संस्कृत-वार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते।

[प्रोमो - सोशल मीडिया]

विदेशमन्त्री

विदेशमन्त्री डॉ. एस्. जयशङ्करः नवदिल्ल्यां श्रीलङ्कायाः विदेशमन्त्रीं विजिथा हेराथ् महोदयम् अमिलत्। तयोः मध्ये द्विपक्षीयसम्बन्धानां क्षेत्रीयस्थितेश्च विषये चर्चा जाता। डॉ. जयशङ्करः अवदत् यत् आई.ओ.आर्.ए. इति हिन्दमहासागर-परिमण्डलसङ्घटने भविष्यमाणायाः चर्चायाः प्रतीक्षा अस्ति। मन्त्री मालदीवदेशस्य विदेशमन्त्रीम् इरुथिशम् आदम महोदयम् अपि अमिलत्। उभौ भारत-मालदीवयोः सम्बन्धानां प्रगतिविषये विचारविनिमयं कृतवन्तौ। एतदपूर्वं डॉ. जयशङ्करः नवदिल्ल्यां सेशेल्सदेशस्य विदेशमन्त्रीं बैरी फॉरे महोदयम् अमिलत्। तौ स्वास्थ्यं, सम्पर्कव्यवस्था, कौशलविकासः, ऊर्जा, कृत्रिमबुद्धिमत्ता चेत्येतेषु क्षेत्रेषु जनकेन्द्रितसहभागिताम् अधिकां सुदृढां कर्तुं स्वसंयुक्तप्रतिबद्धतां पुनः दृढीकृतवन्तौ।

क्रिकेट्

क्रिकेट्-क्रीडायां, श्रीलङ्कायाः 'ए'दलं दोहायां गतरात्रौ आयोजितायाः एशियाकप् राइजिङ् स्टार्स् टूर्नामेंट इत्येतस्याः प्रतिस्पर्धायाः उपान्त्यचक्रे भारतस्य ‘ए’दलम् अष्टस्तोभैः पराजित्य निर्णायकचक्रे स्थानं प्राप्तवत्।

।। इति वार्ताः ।।